**आकाशवाणी**

**दिनाङ्क :- 10.10.2024** **सायं - 06:20**

**मुख्यवार्ता:**

- **प्रधानमन्त्रिणा नरेन्द्र मोदिना सम्मेलने उक्तं यत् भारतस्य एक्ट-ईस्ट-पोलिसी-इति प्रतिवेशि-प्रथम नीति: आसियान् देशै: सह संबंधे ऊर्जां, गतिं दिशश्च प्रददाति। प्रधानमन्त्री नरेन्द्र: मोदी वियन्नचने आसियान-भारतस्य पूर्वीय-एशिया-शिखरसम्मेलने भागं गृह्णाति।**

- **गृहमन्त्रिणा अमित-शाहेन उद्योगानां स्तरम् आकारं च प्रवर्धयितुं समाहूतम् अस्ति।**

- **अशेषे देशे दुर्गा-पूजनोत्सव: धार्मिक-हर्षोल्लासेन सह आमान्यते, विशेषत: पूर्वीय-भारते ।**

- **कजाकिस्ताने अस्तानायाम् आयोजितायाम् एशियन्-टेबल्-टेनिस्-स्पर्धा-मालिकायां भारतीयेन पुरुष-दलेन कांस्य-पदकम् अधिगतम्।**

- **आई.सी.सी.महिला-विंशति–विंशति–क्षेप–चक्रीय-क्रिकेट् विश्वचषक-स्पर्धा-मलिकायाम् अद्य शारजाहे ब-वर्गीये द्वन्द्वे बांग्लादेश: वेस्ट-इंडीज-दलेन सह स्पर्धिष्यते।**

**प्रधानमन्त्री – आसियान**

प्रधानमन्त्री नरेन्द्र-मोदी वियन्नचने आसियान-भारतस्य पूर्वीय-एशिया-शिखरसम्मेलने भागं ग्रहीतुं लाओसदेशं संप्राप्तवान्। प्रवासिन: भारतीयाः श्रीमोदिनः सस्नेहम् स्वागतम् कृतवन्तः। प्रधानमन्त्री नरेन्द्र-मोदी लाओसदेशस्य द्विदिवसीय-यात्रायाम् वियन्नचनं संप्राप्तवान्। प्रधानमन्त्रिणः अनया यात्रया परिणामेन आसियानदेशैः सह भारतस्य सम्बन्धाः अधिकं सुदृढाः भविष्यन्ति। लाओसदेशस्य गृहमन्त्री विलयवोंगे बौद्धाखामः तस्य स्वागतं कृतवान्। श्रीमान् मोदी भारतीयसमुदायेन सह अपि अमिलत्।

**आसियान**

दक्षिणपूर्वीय एशियादेशानां सङ्घटनानि - आसियानस्य चतुश्चत्वारिंशत्तमं पञ्चचत्वारिंशत्तमं च शिखरसम्मेलनं तदनुगताः अन्यानि च उपवेशनानि ह्यः लाओसदेशस्य राजधान्यां वियन्नचने आरब्धानि। उद्घाटनसत्रे लाओसदेशस्य राष्ट्रपतिः थामलोन सिसोलिथः आसियानदेशान् शान्तेः स्थिरतायाः सततविकासस्य च लक्ष्याणाम् दिशि कार्यं कर्तुं आहूतवान्।

लाओसदेशस्य अध्यक्षतायां आयोजितेन आसियानसम्मेलनेन सहैव सप्तविंशतितमं आसियान-चीनसम्मेलनं भारत-आसियान इति तथा पूर्वीय- एशिया- शिखरसम्मेलनसदृशाः अन्ये कार्यक्रमाः अपि आयोज्यन्ते।

प्रधानमन्त्रिणा नरेन्द्र मोदिना सम्मेलने उक्तं यत् भारतस्य एक्ट-ईस्ट-पोलिसी-इति प्रतिवेशि-प्रथम नीति: आसियान् देशै: सह संबंधे ऊर्जां, गतिं दिशश्च प्रददाति। असौ सबलं न्यगदत् यत् एकविंशतितम-शताब्दी भारत-असियान्-देशयो: शताब्दी वर्तते।

**गृहमन्त्री/उद्योगा:**

गृहमन्त्रिणा अमित-शाहेन उद्योगानां स्तरम् आकारं च प्रवर्धयितुं समाहूतम् अस्ति। नवदिल्ल्याम् अद्य पी.एच्.डी.-चैंबर ऑफ् कॉमर्स एंड इंडस्ट्री, इत्यत्र ऊनविंशत्युत्तरैक-शततमं वार्षिकं सत्रं संबोधयन् श्री-शाह: उक्तवान् यत् देशस्य उद्योगै: बृहत् स्वप्ना: द्रष्टव्या:, ये हि विश्वस्मिन् विश्वे व्याप्ता: भवेयु:। गृहमन्त्रिणा उक्तं यत् एतादृशान् स्वप्नान् साकारीकर्तुं संघटनानि उद्योगा: च सम्भूय कार्याणि कुर्यु:। तेन उक्तं यत् सर्वकारेण द्वि-सहस्राधिक-वर्ष-पुरातनानाम् औपनिवेशिक-विधीनाम् अपसारणं कृत्वा समवायाधिनियमे परिष्कार: कृत:, अपि च ऊनचत्वारिंशत्-सहस्राधिकानां नियमानाम् अनुपालनं च सरलीकृतम्।

**दुर्गा-पूजनम्**

अशेषे देशे दुर्गा-पूजनोत्सव: धार्मिकेन, हर्षोल्लासेन सह आमान्यते। पश्चिम-बंगाले जना: दुर्गा-पूजन-समारोहे सोत्साहं भागं गृह्णन्ति। असमप्रदेशे चतुस्सहस्राधिकानि दुर्गा-पूजन-स्थलानि निर्मितानि। अस्माकं वार्ताहरै: सूचितं यत् पूजन-समितिभि: विभिन्नेषु विषयेषु रचनात्मकरीत्या संदेशं प्रसारयितुं अस्थायि-दुर्गा-पूजन-स्थलं सज्जीकृतम्। प्रधानमन्त्री नरेन्द्रमोदी नवरात्रस्य अष्टमदिवसे देव्या: महागौर्या: पूजनं कृतवान्।

**अश्विनी-वैष्णव:**

सूचना-प्रसारण-मन्त्रिणा अश्विनी वैष्णवेन उक्तं यत् भारतीयं चलचित्रं देशे एकतावर्धने महत्वपूर्णां भूमिकां निरवहत्। श्रीवैष्णव: एकस्मिन् लेखे उक्तवान् यत् चलचित्र-विविधता भविष्यस्य च कथा: एकं भारतं श्रेष्ठं भारतम् एक भारत श्रेष्ठ-भारत-इति दृष्टे: दृढीकरणस्य शक्ता: माध्यमा: सन्ति।

**ऋतु-विभाग:**

ऋतुविभागेन अरुणाचलप्रदेश-महाराष्ट्र-क्षेत्रेषु द्विदिवसाभ्यन्तरे तीव्रवृष्टे: सम्भावना प्रकटिता। विभागानुसारेण अस्मिन् सप्ताहे तमिलनाडु-पुडुचेरी-कराईकल-तटवर्तीय-कर्नाटक-दक्षिण-आन्तरिक-कर्नाटक-क्षेत्रेषु तीव्रवृष्टि: सम्भाव्यते। ऋतु-विभागेन द्वित्रदिवसेषु गुजरात-मध्यप्रदेश-उत्तरप्रदेश-बिहार-प्रदेशेषु महाराष्ट्रस्य च केषुचित् क्षेत्रेषु वायव्य-प्रावृट्-प्रत्यावर्तनस्य सम्भावना प्रकटिता।

**एशियन्-टेबल-टेनिस्-स्पर्धा**

कजाकिस्ताने अस्तानायाम् आयोजितायाम् एशियन्-टेबल्-टेनिस्-स्पर्धा-मालिकायां भारतीयेन पुरुष-दलेन कांस्य-पदकम् अधिगतम्। उपान्त्य-चक्रीयायां स्पर्धायाम् अद्य चाइनीज-ताइपेई-दलेन भारतं शून्यं विरुध्य त्रिभि: खेलान्तरालै: पराजितम्।

**बैडमिंटन्**

फिनलैण्डस्य वाण्टायाम् आर्कटिक-ओपन्-बैडमिंटन्-स्पर्धा-मलिकायां भारतस्य किरण-जॉर्ज: लक्ष्य-सेन: च पुरुषाणाम् एकल-वर्गे प्र-प्रागुपान्त्यचक्रं सम्प्रविष्टौ। किरण: गतवासरे विश्व-मानाङ्क-सूच्यां पञ्चविंशति-स्थाने वर्तमानं ताइवान-देशीयं वांग-त्जु-वी-इत्येतं क्रीडकं त्रयोविंशति: एकविंशति:, एकविंशति: अष्टादश इत्येतै: अङ्कान्तरालै: पराजितवान्। अद्यतने द्वन्द्वे स: इंडोनेशिया-देशीयं जोनाथन-क्रिस्टिनं सम्मुखीकरिष्यति। अपरत:, लक्ष्य-सेन: ताइवानस्य छोऊ-तिन-छेनेन सह स्पर्धिष्यते।

**क्रिकेट्**

आई.सी.सी.–महिला-विंशति–विंशति–क्षेप–चक्रीय-क्रिकेट् विश्वचषक-स्पर्धा-मलिकायाम् अद्य शारजाहे ब-वर्गीये द्वन्द्वे बांग्लादेश: वेस्ट-इंडीज-दलेन सह स्पर्धिष्यते। इयं स्पर्धा भारतीय-समयानुसारि सायं सार्ध-सप्तवादने आरप्स्यते। गतरात्रौ दुबय्याम् आयोजिते अ-वर्गीये द्वन्द्वे भारतीय-महिला-क्रिकेट्-दलेन श्रीलंका-दलं द्व्यशीति-धावनाङ्कै: पराजित्य ऐतिहासिक: विजय: अधिगत:।

**।।इति वार्ता:।।**